श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५५

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५५

*कालियमर्दने भगवन्नर्तनवर्णनम्*

अथ वारिणि घोरतरं फणिनं प्रतिवारयितुं कृतधीर्भगवन्।
द्रुतमारिथ तीरगनीपतरुं विषमारुतशोषितपर्णचयम्॥ १ ॥

अधिरुह्य पदाम्बुरुहेण च तं नवपल्लवतुल्यमनोज्ञरुचा।
ह्रदवारिणि दूरतरं न्यपतः परिघूर्णितघोरतरङ्गगणे॥ २ ॥

भुवनत्रयभारभृतो भवतो गुरुभारविकम्पिविजृम्भिजला।
परिमज्जयति स्म धनुश्शतकं तटिनी झटिति स्फुटघोषवती॥ ३ ॥

अथ दिक्षु विदिक्षु परिक्षुभितभ्रमितोदरवारिनिनादभरैः।
उदकादुदगादुरगाधिपतिस्त्वदुपान्तमशान्तरुषाऽन्धमनाः॥ ४ ॥

फणशृङ्गसहस्रविनिस्सृमरज्वलदग्निकणोग्रविषाम्बुधरम्।
पुरतः फणिनं समलोकयथा बहुशृङ्गिणमञ्जनशैलमिव॥ ५ ॥

ज्वलदक्षि परिक्षरदुग्रविषश्वसनोष्मभरः स महाभुजगः।
परिदश्य भवन्तमनन्तबलं परिवेष्टयदस्फुटचेष्टमहो॥ ६ ॥

अविलोक्य भवन्तमथाकुलिते तटगामिनि बालकधेनुगणे।
व्रजगेहतलेऽप्यनिमित्तशतं समुदीक्ष्य गता यमुनां पशुपाः॥ ७ ॥

अखिलेषु विभो भवदीयदशामवलोक्य जिहासुषु जीवभरम्।
फणिबन्धनमाशु विमुच्य जवादुदगम्यत हासजुषा भवता॥ ८ ॥

अधिरुह्य ततः फणिराजफणान्ननृते भवता मृदुपादरुचा।
कलशिञ्जितनूपुरमञ्जुमिळत्करकङ्कणसङ्कुलसङ्क्वणितम्॥ ९ ॥

जहृषुः पशुपास्तुतुषुर्मुनयो ववृषुः कुसुमानि सुरेन्द्रगणाः।
त्वयि नृत्यति मारुतगेहपते परिपाहि स मां त्वमदान्तगदात्॥ १०॥

**********